CBSE Class 9 Sample Paper
Term 2
Sanskrit

Section A

10 अङ्काः

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत—

स्वस्थं पर्यावरणम् अस्माकम् जीवनस्य आधारः अस्ति। पर्यावरणस्य च आधाराः पुष्पिताः पल्लविताः वृक्षाः भवन्ति। प्रत्येकं प्राणी श्वसनक्रियायाम् आक्सीजनवायुं गृह्णाति। वृक्षाणां श्वसनक्रिया तु मानवानां विपरीता अस्ति। अतः अनया पर्यावरणं स्वस्थं भवति। वृक्षाः पर्यावरणं संतुलितं कुर्वन्ति। ते यथाकालं मेघानाम् वर्षणे सहायकाः भवन्ति। वृक्षाः भूमेः जलं गृह्णन्ति। वृक्षाः पुष्पाणां, फलानाम् औषधीनाम् च आगाराः सन्ति। वृक्षपादपानां हरीतिमा तेषां पुष्पाणां शोभा, पक्षिणां कलरवः च शुष्कहृदयान् अपि रसाप्लावितान् कुर्वन्ति।

(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) 1 × 2 = 2

(क) अस्माकम् जीवनस्य आधारः किम् अस्ति?

(ख) वृक्षाः पर्यावरणं कीदृशं कुर्वन्ति?

(ग) पर्यावरणस्य आधाराः के भवन्ति?

(आ) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) 2 × 2 = 4

(क) वृक्षाः केषां वर्धणे सहायकाः भवन्ति?

(ख) वृक्षाः केषाम् आगाराः सन्ति ?

(ग) वृक्षाणां श्वसनक्रिया कीदृशी अस्ति ?

(इ) शीर्षकलेखनम्— 1 × 1 = 1

अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

(ई) भाषिक कार्यम्—(केवलं प्रश्नत्रयम्) 1 × 3 = 3

(क) 'गृह्णाति' इति क्रियायाः कर्तृपदम् किम्?

(ख) 'तरवः' इति पदस्य अत्र किं पर्यायपदम्?

(ग) हृदयान् - अस्य पदस्य विशेषणं किम्?

(घ) 'अस्माकम् जीवनस्य आधारः अस्ति' इत्यत्र किं क्रियापदं प्रयुक्तम् ?

Section B

15 अङ्काः

2. भवान् शैलेशः। भवतः मित्रम् समीरं प्रति पर्वतीययात्रार्थं लिखिते निमन्त्रणपत्रे मञ्जूषातः रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। ½ × 10 = 5

कुरुक्षेत्रतः

तिथिः .....

प्रिय मित्र (क) .....

सप्रेम नमोनमः

पत्रेण ज्ञातम् यत् भवतः नवमकक्षायाः परीक्षा (ख) ..... जाता, परिणामः च अग्रिमे (ग) ..... आगमिष्यति। अहम् अपि अधुना (घ) ..... अनन्तरं परिणामस्य प्रतीक्षां करोमि। अस्मिन् अवकाश-अवसरे अहम् (ङ) ..... कर्तुम् इच्छामि। भवान् अपि शीघ्रम् अत्र (च) ..... आवाम् रुद्र-प्रयागं गमिष्यावः। तत्र मम मातुलस्य (छ) ..... अस्ति। किञ्चित् कालं मिलित्वा (ज) ..... करिष्यावः, बाल्यकालस्य दिवसान् च (झ) .....। आशास्ति भवान् निश्चितरूपेण आगमिष्यति। स्वपित्रोः सेवायाम् मम प्रणामान् निवेदयतु।


भवतः मित्रम्,

(ञ) .....।

मञ्जूषा

मासे, आगच्छेत्, समाप्ता, शैलेशः, व्यतीतम्, स्मरिष्यावः, गृहम्, समीर!, परीक्षायाः, पर्वतयात्राम्।

3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत— $1 \times 5 = 5$



मञ्जूषा

मेघाः, नदी, महिलाः, हर्षिताः, शोभनम्, पुरुषाः, मयूरः, कृषकाः, भवन्ति, आगच्छन्ति, बालाः, पुष्पाणि, उड्डयते, भविष्यति।

अथवा

मञ्जूषायां प्रदत्तशब्दानाम् सहायतया 'प्रातः भ्रमणम्' इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत। $1 \times 5 = 5$

मञ्जूषा

प्रातःकालः, मन्दः पवनः, शीतलः, मनोहारिणी, सर्वत्र, सर्वे, वृद्धाः, पुष्पाणि, बालकाः, उद्यानस्य, भ्रमन्ति, क्रीडन्ति, वहति, शनैः

4. हिन्दी भाषया आङ्गलभाषया वा लिखितानां वाक्यानां संस्कृतेन अनुवादः क्रियताम्। (केवलं पञ्चवाक्यम्) $1 \times 5 = 5$

(क) प्राचीन समय में माधव नामक कोई ग्वाला था।	There was a herdsman named Madhav in the ancient time.
(ख) इस ब्रह्माण्ड में बहुत से नक्षत्र हैं।	There are many stars in this universe.
(ग) पर्यावरण रक्षण में सूर्य की अत्यधिक भूमिका है।	The Sun plays a vital role in the preservation of environment.
(घ) शेर जंगल का राजा कहा जाता है।	The lion is called the king of the forest.
(ङ) नदी का जल अमृत समान होता है।	River water is like nectar.
(च) सीता राम की पत्नी थी।	Sita was the wife of the Ram.
(छ) भारतवर्ष में छः ऋतुएँ होती हैं।	There are six seasons in India.

Section C

15 अङ्काः

5. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 3

परन्तु स्वार्थान्धो मानवः तदेव पर्यावरणम् अद्य नाशयति। स्वल्पलाभाय जना बहुमूल्यानि वस्तूनि नाशयन्ति। जनाः यन्त्रागाराणां विषाक्तं जलं नद्यां निपातयन्ति। तेन मत्स्यादीनां जलचराणां च क्षणेनैव नाशो भवति। नदीजलमपि तत्सर्वथाऽपेयं जायते। मानवाः व्यापारवर्धनाय वनवृक्षान् निर्विवेकं छिन्दन्ति। तस्मात् अवृष्टिः प्रवर्धते, वनपशवश्च शरणरहिता ग्रामेषु उपद्रवं विदधति। शुद्धवायुरपि वृक्षकर्तनात् सङ्कटापन्नो जायते। एवं हि स्वार्थान्धमानवैः विकृतिम् उपगता प्रकृतिः एव सर्वेषां विनाशकर्त्री भवति। विकृतमुजगते पर्यावरणे विविधाः रोगाः, भीषण समस्याश्च सम्भवन्ति।

(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) $\frac{1}{2} \times 2 = 1$

(क) कीदृशः मानवः पर्यावरणं नाशयति?

(ख) नदीजलं सर्वथा कीदृशं जायते?

(ग) किमर्थं जनाः बहुमूल्यानि वस्तूनि नाशयन्ति ?

(आ) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) $1 \times 2 = 2$

(क) विषाक्तजलेन किं भवति?

(ख) पर्यावरणे विकृते जाते किं भवति?

(ग) वनवृक्षाः किमर्थम् छिद्यन्ते ?

6. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 3

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः।
वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरम्॥

(अ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) $\frac{1}{2} \times 2 = 1$

(क) शुभां गिरम् कः व्याजहार?

(ख) कः खगोत्तमः ?

(ग) श्रीमान् कः कथ्यते?

(आ) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) $1 \times 2 = 2$

(क) खगोत्तमः कीदृशः अस्ति?

(ख) वनस्पतिगतः कीदृशं गिरम् व्याजहार?

(ग) शुभां गिरम् कः अकथयत्?

7. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— 3

तपोदत्तः — अहमस्मि तपोदत्तः। बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि। तस्मात् सर्वैः, कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्।

(ऊर्ध्वं निःश्वस्य)

हा विधे! किम् इदं मया कृतम्? कीदृशी दुर्बुद्धिरासीत् तदा! एतदपि न चिन्तितं यत्-

परिधानैरलङ्कारैर्भूषितोऽपि न शोभते।
नरो निर्मणिभोगीव सभायां यदि वा गृहे।।

(किञ्चिद् विमृश्य)

भवतु, किम् एतेन? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्। नाऽसौ भ्रान्तो मन्यते। अतोऽहम् इदानीं तपश्चर्यया विद्यामवाप्तुं प्रवृत्तोऽस्मि।

(जलोच्छलनध्वनिः श्रूयते)

अये कुतोऽयं कल्लोलोच्छलनध्वनिः? महामत्स्यो मकरो वा भवेत्। पश्यामि तावत्।

(आ) एकपदेन उत्तरत—(केवलं प्रश्नद्वयम्) $\frac{1}{2} \times 2 = 1$

(क) कः न अधीतवान्?

(ख) तपोदत्तः कया विद्यामवाप्तुं प्रवृत्तोऽस्ति?

(ग) परिधानैरलङ्कारैः किं भवति?

(आ) पूर्णवाक्येन उत्तरत—(केवलं प्रश्नद्वयम्) $1 \times 2 = 2$

(क) अनधीतः तपोदत्तः कैः गर्हितोऽभवत्?

(ख) बाल्ये कः न अधीतवान्?

(ग) कः भ्रान्तो नमन्यते?

8. अधोलिखितस्यः श्लोकस्यः अन्वये रिक्तस्थानपूर्तिं क्रियताम्— $\frac{1}{2} \times 4 = 2$

तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे।
निरीक्ष्य रावणं क्षिप्रं वैदेहीं च ददर्श सः॥

अन्वयः

सः जटायुरथः तम् (क) ..... तु (ख) ..... । रावणं च (ग) ..... क्षिप्रं (घ) ..... ददर्श।

मञ्जूषा- शुश्रुवे, शब्दमवसुप्तः, वैदेहीं, निरीक्ष्य

अथवा

अधोलिखितस्य श्लोकस्य भावार्थः चित्वा उत्तरपुस्तिकायां पुनः लिखत— $\frac{1}{2} \times 4 = 2$

श्लोकः जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः।
बाभवाहून्दश तदा व्यपाहरदरिन्दमः।

मञ्जूषा- वाम, खगाधिपस्य, पक्षिराजः, जटायो

भावार्थः—क्रोधान्धरावणेन (क) ..... प्राणघातकं प्रहारं पश्चात् (ख) ..... जटायुः त्वयि चञ्चवा प्रहारं कृत्वा तस्य (ग) ..... अङ्गस्य दशवाहून् क्षत-विक्षतं अकरोत्। शत्रुनाशक (घ) ..... पराक्रमः बुद्धिकौशलस्य इदं सुन्दरम् उदाहरणं अस्ति।

9. अधोलिखितं कथांशं समुचित् क्रमेण लिखत— $\frac{1}{2} \times 8 = 4$

(क) हन्त! नास्त्यभावो जगति मूर्खाणाम्।

(ख) अये कुतोऽयं कल्लोलोच्छलन ध्वनिः?

(ग) पश्यामि तावत्।

(घ) तीव्र प्रवाहायां नद्यां मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते।

(ङ) अहमस्मि तपोदत्तः।

(च) तस्मात् सर्वैः कुटुम्बिभिः मित्रैः ज्ञातिजनैश्च गर्हितोऽभवम्।

(छ) भवतु किमेतेन? दिवसे मार्गभ्रान्तः सन्ध्यां यावद् यदि गृहमुपैति तदपि वरम्।

(ज) बाल्ये पितृचरणैः क्लेश्यमानोऽपि विद्यां नाऽधीतवानस्मि।